Reg. No. : ................................

Name : ....................................

**VI Semester B.A. Degree (CBCSS – Reg./Supple./Improv.) Examination, April 2021**
**(2014 – 2018 Admissions)**
**CORE COURSE IN SANSKRIT**
**6B15SKT : Bhagavadgita and Upanishad**

Time : 3 Hours Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः। देवनागरीलिपिरूपयोक्तव्या।*

I. क) वाक्येन वाक्याभ्यां वा उत्तरं लिखत। 5

1) श्रुतौ विस्तरशो मया। कौ ?

2) दर्शयामास परमं रूपमैश्वरम्। कस्मै ?

3) देवदेवस्य शरीरे पाण्डवः किमपश्यत् ?

4) तस्मादुत्तिष्ठ। किमर्थम्।

5) तदेव मे दर्शय। कुतः ?

6) कृष्णस्य चक्रस्य नाम किम् ?

ख) वाक्येन वाक्याभ्यां वा उत्तरं लिखत। 5

7) एष ह वै रयिर्यः पितृयाणः। कः ?

8) कः वै प्राणः ?

9) प्रजापतेः कृष्णपक्षः कः ?

10) एवैतस्मिन् पुरे जाग्रति। के ?

11) कः स्वप्ने महिमानमनुभवति ?

12) सः तेन कतमं लोकं जयति। कः ?

II. क) द्वे व्याख्यात। (2×3=6)

13) पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत।।

14) पश्यामि देवांस्तव देव देहे सर्वांस्तथाभूतविशेषसंघान्।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्।।

15) कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः।।

16) दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गताः।।

ख) द्वे व्याख्यात। (2×3=6)

17) तस्मै स होवाचाकाशो ह वा एष देवो
वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः
श्रोत्रं च। ते प्रकाश्याभिवदन्ति
वयमेतद्बाणमवष्टभ्य विधारयामः।।

18) पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः
परे अर्धे पुरीषिणम्। अथेमे अन्य उ परे।
विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति।

19) स यदा तेजसाभिभूतो भवत्यत्रैष देवः स्वप्नान्न
पश्यत्यथ तदैतस्मिन्छरीर एतत्सुखं भवति।

20) तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता
अनविप्रयुक्ताः। क्रियासु बाह्याभ्यन्तरमध्यमासु
सम्यक्प्रयुक्तासु न कम्पते ज्ञः।



III. द्वयोः लघूपन्यासमारचयत। (2×3=6)

21) विश्वरूपस्य अप्राकृतप्रकाशम्।

अथवा

भगवतोक्तं भक्तिप्राधन्यम्।

22) द्वितीयप्रश्नम्।

अथवा

प्रश्नोपनिषदि शान्तिपाठम्।

IV. द्वे उपन्यस्यत। (2×6=12)

23) भगवद्गीतायाः आध्यात्मिकसत्तां विचारयत।

अथवा

भगवद्गीतायां प्रतिपादितं विश्वरूपदर्शनम्।

अथवा

अर्जुनोक्तं भगवतः महिमानम्।

24) प्रश्नोपनिषदि प्रतिपादितं प्राणतत्त्वम्।

अथवा

प्रश्नोपनिषदि चेतनास्वरूपम्।

अथवा

ओंकारस्वरूपं प्रतिपादयत।